# Muniproktam Rudramantrajapopadesham

# મુનિપ્રોક્તં રુદ્રમન્ત્રજપોપદેશમ્

## Document Information

Text title : Muniproktam Rudramantrajapopadesham

File name : muniproktaMrudramantrajapopadesham.itx

Category : shiva, shivarahasya, mantra, upadesha, advice

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | bhImAkhyaH aShTamAMshaH | adhyAyaH 12 | 1-44||

Latest update : July 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 5, 2024

*sanskritdocuments.org*

# મુનિપ્રોક્તં રુદ્રમન્ત્રજપોપદેશમ્

(શિવરહસ્યાન્તર્ગતે ભીમાખ્યે)

મુનિરુવાચ ।

શ્રીરુદ્રમન્ત્રાન્પ્રજપન્નિયતં ભસ્મધાર્યપિ ।
રુદ્રમન્ત્રાન્ જપન્વિપ્રો ધયાયેદ્દેવમુમાપતિમ્ ॥ ૧॥

વેદાનાં મધ્યગં(ગઃ) સાક્ષાદ્યજુષાં મધ્યગં(ગઃ) પરમ્(રઃ) ।
શતશાખાતં(સ્)ત્વેતદ્રુદ્રમન્ત્રઃ શિવપ્રિયઃ ॥ ૨॥

રુદ્રપ્રિયકરં(રઃ) સાક્ષાદ્રુદ્રમન્ત્રં(ત્રઃ) શ્રુતિઃશ્રુતમ્ ।
રુદ્રાધ્યાયાર્થવિજ્ઞાની પદાર્થજ્ઞાનવાન્નરઃ ॥ ૩॥

નમોઽન્તેન શિવં ધ્યાયન્સર્વપાપૈઃ પ્રમુચ્યતે ।
નમોઽન્તેન ચ તદ્રૂપધારી શિવાય એવ હિ ॥ ૪॥

ધ્યાયન્મહેશં તદ્રૂપં પતીનાં પરમેશ્વરમ્ (પતિમીશ્વરમ્) ।
સર્વેષામપ્યુમાકાન્તં નિતાન્તં શાન્તમવ્યયમ્ ॥ ૫॥

રુદ્રાધ્યાયગતૈર્મન્ત્રૈર્નમોઽન્તૈરુભયૈરપિ ।
એકદ્વિત્રિનમસ્કારૈર્ધ્યાયેદ્દેવં પિનાકિનમ્ ॥ ૬॥

સર્વદેવાધિદેવેશં વિશ્વેશં રુદ્રસૂક્તતઃ ।
ધ્યાયન્મન્ત્રાઞ્જપેદ્રુદ્રાંસ્તત્તદર્થાવબોધતઃ ॥ ૭॥

શ્રીરુદ્રમન્ત્રં પ્રજપેદ્ભસ્મધારણપૂર્વકમ્ ।
ભસ્મધાર્યધિકારી ચ તથા રુદ્રાક્ષધાર્યપિ ॥ ૮॥

રુદ્રાધ્યાયજપે યોગ્યાસ્ત એવ ભુવને દ્વિજાઃ ।
નાન્યપુણ્ડ્રધરાઃ સર્વે નાધિકારિણ એવ હિ ॥ ૯॥

પ્રત્યુતો રુદ્રમન્ત્રાંશ્ચ પ્રજપન્ પાપભાગ્ભવેત્ ।
(પ્રત્યુત પ્રજપન્રુદ્રમન્ત્રાંશ્ચ પાપભાગ્ભવેત્) ।

યસ્તુ રુદ્રાઞ્જપેન્નિત્યં ધ્યાયમાનો મહેશ્વરમ્ ॥ ૧૦॥

સર્વપાપવિશુદ્ધાત્મા શિવત્વમુપગચ્છતિ ॥ ૧૧॥

સ્તેયં કૃત્વા બ્રહ્મહત્યાં ચ કૃત્વા
મદ્યં પીત્વા ગુરુદારાંશ્ચ ગત્વા ।
ભસ્મછન્નો ભસ્મશય્યાં શયાનો
રુદ્રધ્યાયી મુચ્યતે સર્વપાપૈઃ ॥ ૧૨॥

એકવારં જપન્ રુદ્રં પાપૈર્મુક્તો ભવિષ્યતિ ।
દ્વિવારં ચ પ્રજપ્યૈવ રુદ્રં ધ્યાયન્મહેશ્વરમ્ ॥ ૧૩॥

ગાણપત્યમવાપ્નોતિ શિવસ્ય પરમાત્મનઃ ।
તૃતીયવારં પ્રપઞ્છિવે સંલીયતે સદા ॥ ૧૪॥

એકાદશાનુવારં યો રુદ્રમન્ત્રં જપેદ્બુધઃ (દ્વિજઃ) ।
શં ચ મે ઇત્યાદિ ચ જપન્ ક્રમાદેકાદશાવૃતમ્ ॥ ૧૫॥

જપાલ્લિઙ્ગેઽભિષેકો(કાત્) વૈ શમ્ભોઃ પ્રિયતમો મતઃ ।
વસ્ત્રપૂતેન તોયેન અવિચ્છિન્નાં પ્રકલ્પયેત્ ॥ ૧૬॥

ધારાં પ્રીત્યા પ્રકલ્પેત શિવલિઙ્ગે દ્વિજોત્તમઃ ।
જપાદપ્યુત્તમઃ સેકઃ શ્રીરુદ્રાધ્યાયપૂર્વકઃ ॥ ૧૭॥

જપાદ્દશગુણઃ પ્રોક્તો હ્યભિષેકો મહેશિતુઃ ।
ચન્દનૈર્બિલ્વપત્રૈશ્ચ પૂજયેદિન્દુશેખરમ્ ॥ ૧૮॥

રુદ્રૈઃ સ્તુવીત દેવેશં સામ્બં સંસારભેષજમ્ ।
સ્તુત્વા રુદ્રૈર્મહાદેવ સન્નિધૌ ગણપો ભવેત્ ॥ ૧૯॥

રુદ્રૈર્હોમં પ્રકુર્વીત ચરુણામધુસર્પિષા ।
નામભિર્દેવદેવસ્ય સ્વાહાન્તૈશ્ચ પૃથક્ પૃથક્ ॥ ૨૦॥

ગ્રહારિષ્ટે સમુત્પન્ને ઉત્પાતે ક્ષ્માદિકમ્પને ।
દેશોપસર્ગે દુર્ભુક્ષે રાજચોરાદ્યુપદ્રવે ॥ ૨૧॥

પ્રજાપશુમૃતૌ ચાપિ જપહોમાર્ચનં ચરેત્ ।
રુદ્રૈર્મન્ત્રૈરયુતશો ધ્યાયન્દેવં પિનાકિનમ્ ॥ ૨૨॥

બ્રાહ્મણૈઃ શામ્ભવૈરેવ ભસ્મરુદ્રાક્ષધારિભિઃ ।
કારયેદ્વિધિવદ્રાજા ધનાઢ્યો વાપિ કશ્ચન ॥ ૨૩॥

ગાવો ભૂમિર્હિરણ્યાદ્યાઃ પ્રદેયાઃ શક્તિસારતઃ ।
શામ્ભવેભ્યઃ સદા રોગતાપપાપૈઃ પ્રમુચ્યતે ॥ ૨૪॥

રુદ્રમન્ત્રજપે યોગ્યાઃ શામ્ભવા એવ કેવલમ્ ।
અતિરુદ્રવિધાનં વા મહારુદ્રમથાપિ વા ॥ ૨૫॥

કુર્યાત્સર્વોપસર્ગેભ્યો ન ભયં જાયતે ક્વચિત્ ।
ઘૃતધારાં પાતયેતાવિચ્છિન્નાં રુદ્રમન્ત્રતઃ ॥ ૨૬॥

વહ્નૌ કુણ્ડે શિવં ધ્યાત્વા શામ્ભવાષ્ટોત્તરૈઃ શતૈઃ ।
એકાદશાનુવૃત્ત્યૈવં મણ્ડલં ધનધાન્યવાન્ ॥ ૨૭॥

મુક્તઃ શિવમયો ભૂયાદકામઃ કામવાન્ યદિ ।
સર્વકામાનવાપ્નોતિ વત્સરાન્તે ન સંશયઃ ॥ ૨૮॥

ગોષ્ઠે વાપિ નદીરીતે રુદ્રક્ષેત્રે શતોત્તરમ્ ।
જપ્યૈવ કર્મ કૃત્વાપિ ફલં વિન્દેદ્દશોત્તરમ્ ॥ ૨૯॥

ક્ષીરાભિષેકં લિઙ્ગે તુ રુદ્રમન્ત્રૈઃ સમાચરેત્ ।
ન ભૂયસ્સ્તન્યપો માતુર્ભવિષ્યતિ ન સંશયઃ ॥ ૩૦॥

યો રુદ્રે વા નમસ્કારં પ્રદક્ષિણમથાપિ વા ।
કુર્યાચ્છિવાલયે શમ્ભોઃ સન્નિધૌ સ તુ મુક્તિભાક્ ॥ ૩૧॥

રુદ્રમન્ત્રૈઃ શૂલિનં યઃ સ્તુવન્નર્તનમાચરેત્ ।
સ શમ્ભોર્ગણપો ભૂયાદ્વત્સરેણ ન સંશયઃ ॥ ૩૨॥

અવિમુક્તે શિવક્ષેત્રેષ્વન્યેષ્વપિ યથા બલમ્ ।
રુદ્રં જપન્પ્રમુચ્યેત પાપેભ્યો નાત્ર સંશયઃ ॥ ૩૩॥

યો બિલ્વમૂલે રુદ્રાંશ્ચ જપેદ્ધ્યાયન્મહેશ્વરમ્ ।
સ કોટિરુદ્રસામ્યસ્ય ફલં લબ્ધ્વા વિમુચ્યતે ॥ ૩૪॥

જાબાલા આમનન્ત્યેવ મહિમાં રુદ્રજાપિનઃ ।
કિં જપ્યેનામૃતમિતિ રુદ્રૈરેવેતિ સા શ્રુતિઃ ॥ ૩૫॥

યતિશ્ચ પ્રજપેન્નિત્યં વને વર્ણી ગૃહી તથા ।
યાવન્નમોઽન્તં તુ યતેરન્યે તુ ગૃહમેધિનઃ ॥ ૩૬॥

યત્ર સ્થિતો રુદ્રજાપી તત્ર શમ્ભુઃ સ્થિતઃ સદા ।

તસ્મૈ દત્તં શામ્ભવાય દત્તં તચ્છમ્ભવે સદા ॥ ૩૭॥

ગાં ભૂમિમથ વાસો વા ધનં ધાન્યં હિરણ્યકમ્ ।
દત્વા શિવપ્રસાદસ્ય પાત્રં શ્રીરુદ્રજાપિને ॥ ૩૮॥

એકવારં જપન્રુદ્રં તદ્ગ્રામે શાન્તિમૃચ્છતિ ।
ગ્રામે અસ્મિન્નનાતુરમિતિ મન્ત્રાર્થપારગઃ ॥ ૩૯॥

શતવારં તુ નગરે પુરેઽયુતજપાદ્ભવેત્ ।
તત્રસ્થાનાં શુભં ભૂયાદ્યત્ર રુદ્રજપો ભવેત્ ॥ ૪૦॥

કુમ્ભં સંસ્પૃશ્ય યો રુદ્રં સોદકં પ્રજપન્ દ્વિજઃ ।
સ્નાપયેચ્ચાપિ રોગાર્ત્તં રોગી રોગૈઃ પ્રમુચ્યતે ॥ ૪૧॥

વન્ધ્યા કુમારં સૂતે ચાતીવ પ્રેમાસ્પદં સ્થિરમ્ ।
એવં રહસ્યમનઘં શતરુદ્રમન્ત્ર-
જાપ્યાભિષેકનિયમૈઃ શિવપૂજનેન ।
તસ્મૈ પ્રસીદતિ સદા શશિખણ્ડમૌલિ-
રાખણ્ડલાજહરિવન્દિતપાદપીઠઃ ॥ ૪૩॥

રુદ્રાધ્યાયજપાનુરક્તહૃદયા રુદ્રાક્ષભસ્માદરા
જપ્ત્વા વાપ્યષિચ્ય વા શશિમહાચૂડોરુલિઙ્ગં સદા ।
મૂઢો વાપ્યથપણ્ડિતો યતિવરો ભૂયાચ્છિવાગ્રેસરો
વિષ્ણુબ્રહ્મમરુદ્ગણાર્ચિતપદો નન્દીશતુલ્યો ગણઃ ॥ ૪૪॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ઋષિકશ્યપપ્રોક્તં રુદ્રાક્ષમહિમાવર્ણનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ભીમાખ્યઃ અષ્ટમાંશઃ । અધ્યાયઃ ૧૨ । ૧-૪૪॥

- .. shrIshivarahasyam . bhImAkhyaH aShTamAMshaH . adhyAyaH 12 . 1-44..

Notes:
Muni મુનિ delivers Upadeśa ઉપદેશ about the merits of Rudra Mantra Japa રુદ્ર મન્ત્ર જપ, especially Rudrādhyāya Japa રુદ્રાધ્યાય જપ.

Proofread by Ruma Dewan

*Muniproktam Rudramantrajapopadesham*

pdf was typeset on July 5, 2024

Please send corrections to *sanskrit@cheerful.com*